# lalitAstavaratnam by Durvasa

# લલિતાસ્તવરત્નં મહર્ષિદૂર્વાસઃ પ્રણીતમ્

## Document Information

Text title : Lalitastavaratnam or Arya Dvishati by durvasamaharshi

File name : lalitAstavaratnam.itx

Category : devii, dashamahAvidyA, lalitA, devI, dvishatI, stavarAja

Location : doc_devii

Author : Traditional

Transliterated by : DPD

Proofread by : DPD

Latest update : November 25, 2012, August 12, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# લલિતાસ્તવરત્નં મહર્ષિદૂર્વાસઃ પ્રણીતમ્

આર્યા દ્વિશતી ચ

॥ શ્રી લલિતાસ્તવરત્નમ્ પારાયણ ક્રમઃ ॥

વન્દે ગજેન્દ્રવદનં વામાઙ્કારૂઢવલ્લભાશ્લિષ્ટમ્ ।
કુઙ્કુમપરાગશોણં કુવલ્યિનીજાર-કોરકાપીડમ્ ॥

અસ્ય શ્રી લલિતાસ્તવરત્નમાલામહામન્ત્રસ્ય ।
ભગવાન્ શ્રીદુર્વાસા ઋષિઃ । પંક્તિઃ છન્દઃ ।
સપરિવારશ્રીલલિતામહાત્રિપુરસુન્દરી દેવતા ॥

ઐં તાપિઞ્ચમેચકાભાં તાલીદલરચિત કર્ણતાટઙ્કામ્ ।
તામ્બૂલપૂરિતમુખીં તામ્રાધરબિમ્બદરહાસામ્ ॥ ઇતિ બીજમ્ ॥

સૌઃ ધૂર્તાનામતિદૂરા વાર્તા શેષાવલગ્ન કમનીયા ।
આર્તાલીશુભદાત્રી વાર્તાલી ભવતુ વાઞ્છિતાર્થાય ॥ ઇતિ શક્તિઃ ॥

ક્લીં આદિમરસાવલમ્બાં અનિદમ્પ્રથમાક્તિવલ્લરીકલિકામ્ ।
આબ્રહ્મકીટજનનીંમન્તઃ કલયામિ સુન્દરીમનિશમ્ ॥ ઇતિ કીલકમ્ ॥

મમ સપરિવારશ્રીલલિતામહાત્રિપુરસુન્દરીપ્રસાદસિદ્ધિદ્વારા
સર્વાભીષ્ટસિદ્ધ્યર્થે પારાયણે વિનિયોગઃ ।
કુઙ્કુમલલામભાસ્વન્નિટિલાં કુટિલતરછિલ્લિકા યુગલામ્ ।
નાલીકતુલ્યનયનાં નાસાઞ્ચલનટિતમૌક્તિકાભરણામ્ ॥

અઙ્ગુષ્ટાભ્યાં નમઃ । હૃદયાય નમઃ ॥ ૧॥

અઙ્કુરિત મન્દહાસાં અરુણાધરકાન્તિવિજિતબિમ્બાભામ્ ।
કસ્તૂરીમકરીયુતકપોલસંક્રાન્તકનકતાટઙ્કામ્ ॥

તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા ॥ ૨॥

કર્પૂરસાન્દ્રવીટીકબલિતવદનારવિન્દકમનીયામ્ ।

કમ્બુસહોદરકણ્ઠપ્રલમ્બમાનાચ્છમૌક્તિકકલાપામ્ ॥

મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ ॥ ૩॥

કલ્હારદામકોમલ ભુજયુગલ સ્ફુરિત રત્નકેયૂરામ્ ।
કરપદ્મમૂલવિલસત્ કાઞ્ચનમયકટકવલયસન્દોહામ્ ॥

અનામિકાભ્યાં નમઃ । કવચાય હું ॥ ૪॥

પાણિચતુષ્ટયવિલસત્પાશાङ્કુશપુણ્ડ્રચાપપુષ્પાસ્રામ્ ।
કૂલઙ્કુષકુચશિખરાં કુઙ્કુમકર્દમિતરત્નકૂર્પાસામ્ ॥

કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ॥ ૫॥

કમલભવકઞ્જલોચનકિરીટરત્નાંશુરઞ્જિતપદાબ્જામ્ ।
ઉન્મસ્તકાનુકમ્પામુત્તરલાપાङ્કુપોષિતાનઙ્ગામ્ ॥

કરતલકરપૃષ્ટાભ્યાં નમઃ । અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥ ૬॥

॥ ધ્યાનમ્ ॥

આદિમરસાવલમ્બામ્ અનિદમ્પ્રથમોક્તિવલ્લરીકલિકામ્ ।
આબ્રહ્મકીટજનનીં અન્તઃ કલયામિ સુન્દરીમનિશમ્ ॥ ૧॥

નતજનસુલભાય નમો નાલીકસનાભિલોચનાય નમઃ ।
નન્દિતગિરિશાય નમો મહસે નવનીપપાટલાય નમઃ ॥ ૨॥

પવનમયિ પાવકમયિ ક્ષોણીમયિ ગગનમયિ કૃપીટમયિ ।
રવિમયિ શશિમયિ દિઙ્મયિ સમયમયિ પ્રાણમયિ શિવે પાહિ ॥ ૩॥

કાલિ કપાલિનિ શૂલિનિ ભૈરવિ માતઙ્ગિ પઞ્ચમિ ત્રિપુરે ।
વાગ્દેવિ વિન્ધ્યવાસિનિ બાલે ભુવનેશિ પાલય ચિરં મામ્ ॥ ૪॥

લમિત્યાદિ પઞ્ચપૂજા ॥

તતઃ પારાયણાન્તરમં હૃદયાદિન્યાસં વિધાય ધ્યાત્વા
પઞ્ચોપચારૈઃ સમ્પૂજયેત્ ॥

॥ મહર્ષિદુર્વાસઃ પ્રણીતં શ્રી લલિતાસ્તવરત્નમ્ ॥

॥ આર્યા દ્વિશતી ॥

વન્દે ગજેન્દ્રવદનં વામાઙ્કારૂઢવલ્લભાશ્લિષ્ટમ્ ।
કુઙ્કુમપરાગશોણં કુવલયિનીજાર-કોરકાપીડમ્ ॥ ૧॥

સ જયતિ સુવર્ણશૈલઃ સકલજગચ્ચક્રસઙ્ઘટિતમૂર્તિઃ ।
કાઞ્ચન નિકુઞ્જવાટી કન્દલદમરીપ્રપઞ્ચ સઙ્ગીતઃ ॥ ૨॥

હરિહયનૈરૃતમારુતહરિતામન્તેષ્વવસ્થિતં તસ્ય ।
વિનુમઃ સાનુત્રિતયં વિધિહરિગૌરીશવિષ્ટપાધારમ્ ॥ ૩॥

મધ્યે પુનર્મનોહરરત્નરુચિસ્તબક રઞ્જિતદિગન્તમ્ ।
ઉપરિ ચતુઃ શતયોજનમુત્તઙ્ગ શ‍ૃઙ્ગમ્પુઙ્ગવમુપાસે ॥ ૪॥

તત્ર ચતુઃ શતયોજનપરિણાહં દેવ શિલ્પિના રચિતમ્ ।
નાનાસાલમનોજ્ઞં નમામ્યહં નગરં આદિવિદ્યાયાઃ ॥ ૫॥

પ્રથમં સહસ્રપૂર્વક ષટ્શતસંખ્યાક યોજનં પરિતઃ ।
વલયીકૃતસ્વગાત્રં વરણં શરણં વ્રજામ્યયો રૂપમ્ ॥ ૬॥

તસ્યોત્તરે સમીરણયોજનદૂરે તરઙ્ગિતચ્છાયઃ ।
ઘટયતુ મુદં દ્વિતીયો ઘણ્ટાસ્તનસાર નિર્મિતઃ સાલઃ ॥ ૭॥

ઉભયોરન્તરસીમન્યુદ્દામ ભ્રમરરઞ્જિતોદારમ્ ।
ઉપવમનમુપાસ્મહે વયમૂરીકૃત મન્દમારુત સ્યન્દમ્ ॥ ૮॥

આલિઙ્ગ્ય ભદ્રકાલીમાસીનસ્તત્ર હરિશિલાશ્યામામ્ ।
મનસિ મહાકાલો મે વિહરતુ મધુપાનવિભ્રમન્નેત્રઃ ॥ ૯॥

તાર્त્તીયીકો વરણસ્તસ્યોત્તરસીમ્નિ વાતયોજનતઃ ।
તામ્રેણ રચિતમૂર્તિસ્તનુતાદા ચન્દ્રતારકં ભદ્રમ્ ॥ ૧૦॥

મધ્યે તયોશ્ચ મણિમયપલ્લવશાખા પ્રસૂનપક્ષ્મલિતામ્ ।
કલ્પાનોકહવાટીં કલયે મકરન્દપઙ્કિલાવાલામ્ ॥ ૧૧॥

તત્ર મધુમાધવશ્રીતરુણીભ્યાં તરલદૃક્ચકોરાભ્યામ્ ।
આલિઙ્ગિતોઽવતાન્મામનિશં પ્રથમર્તુરાત્તપુષ્પાસ્રઃ ॥ ૧૨॥

નમત તદુત્તરભાગે નાકિપથોલ્લઙ્ઘિ શ‍ૃઙ્ગસઙ્ઘાતમ્ ।
સીસાકૃતિં તુરીયં સિતકિરણાલોકનિર્મલં સાલમ્ ॥ ૧૩॥

સાલદ્વયાન્તરાલે સરલાલિકપોત-ચાટુસુભગાયામ્ ।
સન્તાનવાટિકાયાં સક્તં ચેતોઽસ્તુ સતતમસ્માકમ્ ॥ ૧૪॥

તત્ર તપનાદિરૂક્ષઃ સામ્રાજ્ઞીચરણ સાન્દ્રિતસ્વાન્તઃ ।
શુક્ર શુચિશ્રીસહિતો ગ્રીષ્મર્તુર્દિશતુ કીર્તિમાકલ્પમ્ ॥ ૧૫॥

ઉત્તરસીમનિ તસ્યોન્નતશિખરોત્કમ્પિ હાટકપતાકઃ ।
પ્રકટયતુ પઞ્ચમો નઃ પ્રાકારઃ કુશલમારકૂટમયઃ ॥ ૧૬॥

પ્રાકારયોશ્ચ મધ્યે પલ્લવિતાન્યભૃતપઞ્ચમોન્મેષા ।
હરિચન્દનદ્રુવાટીહરતાદામૂલમસ્મદનુતાપમ્ ॥ ૧૭॥

તત્ર નભશ્રી મુખ્યૈસ્તરુણી વર્ગૈઃ સમન્વિતઃ પરિતઃ ।
વજ્રાટ્ટટ્ટહાસમુખરો વાઞ્છાપૂર્તિં તનોતુ વર્ષર્તુઃ ॥ ૧૮॥

મારુતયોજનદૂરે મહનીયસ્તસ્ય ચોત્તરે ભાગે ।
ભદ્રં કૃષીષ્ટ ષષ્ઠઃ પ્રાકારઃ પઞ્ચલોહધાતુમયઃ ॥ ૧૯॥

અનયોર્મધ્યે સન્તતમઙ્કૂરદ્દિવ્યકુસુમગન્ધાયામ્ ।
મન્દારવાટિકાયાં માનસમઙ્ગીકરોતુ મે વિહૃતિમ્ ॥ ૨૦॥

તસ્યામિષોર્જલક્ષ્મીતરુણીભ્યાં શરદૃતુઃ સદા સહિતઃ ।
અભ્યર્ચયન્ સ જીયાદમ્બામામોદમેદુરૈઃ કુસુમૈઃ ॥ ૨૧॥

તસ્યર્ષિસંખ્યયોજનદૂરે દેદીપ્યમાનશ‌ૃઙ્ગૌઘઃ ।
કલધૌતકલિતમૂર્તિઃ કલ્યાણં દિશતુ સપ્તમઃ સાલઃ ॥ ૨૨॥

મધ્યે તયોર્મરુત્પથ લઙ્ઘિથવિટ-પાગ્રવિરુતકલકણ્ઠા ।
શ્રીપારિજાતવાટી શ્રિયમનિશં દિશતુ શીતલોદ્દેશા ॥ ૨૩॥

તસ્યામતિપ્રિયાભ્યાં સહખેલન્ સહસહસ્ય લક્ષ્મીભ્યામ્ ।
સામન્તો ઝષકેતોર્હેમન્તો ભવતુ હેમવૃદ્ધ્યૈ નઃ ॥ ૨૪॥

ઉત્તરતસ્તસ્ય મહાનુદ્ભટ હુત્ભુક્ષિ સ્વારુણઃ મયૂખઃ ।
તપનીયખણ્ડરચિતસ્તનુતાદાયુષ્યમષ્ટમો વરણઃ ॥ ૨૫॥

કાદમ્બવિપિનવાટીમનયોર્મધ્યભુવિ કલ્પિતાવાસામ્ ।
કલયામિ સૂનકોરકકન્દલિતામોદ-તુન્દિલસમીરામ્ ॥ ૨૬॥

તસ્યામતિ-શિશિરાકૃતિરાસીનસ્તપતપસ્યલક્ષ્મીભ્યામ્ ।
શિવમનિશં કુરુતાન્મે શિશિરર્તુઃ સતતશીતલદિગન્તઃ ॥ ૨૭॥

તસ્યાં કદમ્બવાટ્યાં તત્પ્રસવામોદમિલિત-મધુગન્ધમ્ ।

સપ્તાવરણમનોજ્ઞં શરણં સમુપૈમિ મન્ત્રિણી-શરણમ્ ॥ ૨૮॥

તત્રાલયે વિશાલે તપનીયારચિત-તરલ-સોપાને ।
માણિક્ય મણ્ડપાન્તર્મહિતે સિંહાસને મણીખચિતે ॥ ૨૯॥

બિન્દુ-ત્રિપઞ્ચ-કોણ-દ્વિપ-નૃપ-વસુ-વેદ-દલ-કુરેખાઢ્યે ।
ચક્રે સદા નિવિષ્ટાં ષષ્ઠ્યષ્ટત્રિંશદક્ષરેશાનીમ્ ॥ ૩૦॥

તાપિઞ્છમેચકાભાં તાલીદલઘટિતકર્ણતાટઙ્કામ્ ।
તામ્બૂલપૂરિતમુખીં તામ્રાધરબિમ્બદૃષ્ટદરહાસામ્ ॥ ૩૧॥

કુઙ્કુમપઙ્કિલદેહાં કુવલય-જીવાતુ-શાવકાવતંસામ્ ।
કોકનદશોણચરણાં કોકિલ-નિક્વાણ-કોમલાલાપામ્ ॥ ૩૨॥

વામાઙ્ગગલિતચૂલીં વનમાલ્યકદમ્બમાલિકાભરણામ્ ।
મુક્તાલલન્તિકાઞ્ચિત મુગ્ધાલિક-મિલિત-ચિત્રકોદારામ્ ॥ ૩૩॥

કરવિધૃતકીરશાવક-કલ-નિનદ-વ્યક્ત-નિખિલ-નિગમાર્થામ્ ।
વામકુચસઙ્ગિવીણાવાદનસૌખ્યાર્ધમીલિતાક્ષિયુગામ્ ॥ ૩૪॥

આપાટલાંશુકધરાં આદિરસોન્મેષવાસિત કટાક્ષામ્ ।
આમ્નાયસારગુલિકાં આદ્યાં સઙ્ગીતમાતૃકાં વન્દે ॥ ૩૫॥

તસ્ય ચ સુવર્ણસાલસ્યોત્તરતસ્તરુણકુઙ્કુમચ્છાયઃ ।
શમયતુ મમ સન્તાપં સાલો નવમઃ સ પુષ્પરાગમયઃ ॥ ૩૬॥

અનયોરન્તરવસુધાઃ પ્રણુમઃ પ્રત્યગ્રપુષ્પરાગમયીઃ ।
સિંહાસનેશ્વરીમનુચિન્તન-નિસ્તન્દ્ર-સિદ્ધનીરન્ધ્રાઃ ॥ ૩૭॥

તત્સાલોત્તરદેશે તરુણજપા-કિરણ-ધોરણી-શોણઃ ।
પ્રશમયતુ પદ્મરાગપ્રાકારો મમ પરાભવં દશમઃ ॥ ૩૮॥

અન્તરભૂકૃતવાસાનનયોરપનીત ચિત્તવૈમત્યાન્ ।
ચક્રેશીપદભક્તાંશ્ચારણવર્ગાનહર્નિશં કલયે ॥ ૩૯॥

સારઙ્ગવાહયોજનદૂરેઽસઙ્ઘટિત કેતનસ્તસ્ય ।
ગોમેદકેન રચિતો ગોપાયતુ માં સમુન્નતઃ સાલઃ ॥ ૪૦॥

વપ્રદ્વયાન્તરોર્વ્યાં વટુકૈર્વિવિધૈશ્ચ યોગિની વૃન્દૈઃ ।
સતતં સમર્ચિતાયાઃ સઙ્કર્ષિણ્યાઃ પ્રણૌમિ ચરણાબ્જમ્ ॥ ૪૧॥

તાપસયોજનદૂરે તસ્ય સમુત્તુઙ્ગઃ ગોપુરોપેતઃ ।
વાઞ્છાપૂર્ત્યૈ ભવતાદ્વજ્રમણી-નિકર-નિર્મિતો વપ્રઃ ॥ ૪૨॥

વરણદ્વિતયાન્તરતો વાસજુષો વિહિતમધુરસાસ્વાદાઃ ।
રમ્ભાદિવિબુધવેશ્યાઃ રચયન્તુ મહાન્તમસ્મદાનન્દમ્ ॥ ૪૩॥

તત્ર સદા પ્રવહન્તિ તટિની વજ્રાભિધા ચિરં જીયાત્ ।
ચટુલોર્મિજાલનૃત્યત્ કલહંસીકુલકલક્વણિતપુષ્ટા ॥ ૪૪॥

રોધસિ તસ્યા રુચિરે વજ્રેશી જયતિ વજ્રભૂષાઢ્યા ।
વજ્રપ્રદાનતોષિતવજ્રિમુખત્રિદશ-વિનુતચારિત્રા ॥ ૪૫॥

તસ્યોદીચ્યાં હરિતિ સ્તવકિતસુષમાવલીઢ-વિયદન્તઃ ।
વૈડૂર્યરત્નરચિતો વૈમલ્યં દિશતુ ચેતસો વરણઃ ॥ ૪૬॥

અધિમધ્યમેતયોઃ પુનરમ્બાચરણાવલમ્બિતસ્વાન્તામ્ ।
કાર્કોટકાદિનાગાન્ કલયામઃ કિં ચ બલિમુખાન્દનુજાન્ ॥ ૪૭॥

ગન્ધવહસંખ્ય-યોજનદૂરે ગગનોર્ધ્વજાઙ્ઘિકસ્તસ્ય ।
વાસવમણિપ્રણીતો વરણો વર્ધયતુ વૈદુષીં વિશદામ્ ॥ ૪૮॥

મધ્યક્ષોણ્યામનયોર્મહેન્દ્રનીલાત્મકાનિ ચ સરાંસિ ।
શાતોદરી સહાયાન્ભૂપાલાનપિ પુનઃ પુનઃ પ્રણુમઃ ॥ ૪૯॥

આશુગયોજનદૂરે તસ્યોર્ધ્વં કાન્તિધવલિતદિગન્તઃ ।
મુક્તાવિરચિતગાત્રો મુહુરસ્માકં મુદે ભવતુ વપ્રઃ ॥ ૫૦॥

આવૃત્ત્યોરધિમધ્યં પૂર્વસ્યાં દિશિ પુરન્દરઃ શ્રીમાન્ ।
અભ્રમુવિટાધિરૂઢો વિભ્રમમસ્માકમનિશમાતનુતાત્ ॥ ૫૧॥

તત્કોણે વ્યજનસ્રુક્તોમરપાત્રસ્રુવાન્ન શક્તિધરઃ ।
સ્વાહાસ્વધાસમેતઃ સુખયતુ માં હવ્યવાહનઃ સુચિરમ્ ॥ ૫૨॥

દક્ષિણદિગન્તરાલે દણ્ડધરો નીલનીરદચ્છાયઃ ।
ત્રિપુરપદાબ્જભક્તસ્તિરયતુ મમ નિખિલમંહસાં નિકરમ્ ॥ ૫૩॥

તસ્યૈવ પશ્ચિમાયાં દિશિ દલિતેન્દીવર પ્રભાશ્યામઃ ।
ખેટાસિ યષ્ટિધારી ખેદાનપનયતુ યાતુધાનો મે ॥ ૫૪॥

તસ્યા ઉત્તરદેશે ધવલાઙ્ગો વિપુલઝષ વરારૂઢઃ ।
પાશાયુધાત્તપાણિઃ પાશી વિદલયતુ પાશજાલાનિ ॥ ૫૫॥

વન્દે તદુત્તરહરિત્કોણે વાયું ચમૂરુવરવાહમ્ ।
કોરકિત તત્ત્વબોધાન્ગોરક્ષ પ્રમુખ યોગિનોઽપિ મુહુઃ ॥ ૫૬॥

તરુણીરિડાપ્રધાનાસ્તિસ્રો વાતસ્ય તસ્ય કૃતવાસાઃ ।
પ્રત્યગ્રકાપિશાયનપાન-પરિભ્રાન્ત-લોચનાઃ કલયે ॥ ૫૭॥

તલ્લોકપૂર્વભાગે ધનદં ધ્યાયામિ શેવધિકુલેશમ્ ।
અપિ માણિભદ્રમુખ્યાનમ્બાચરણાવલમ્બિનો યક્ષાન્ ॥ ૫૮॥

તસ્યૈવ પૂર્વસીમનિ તપનીયારચિતગોપુરે નગરે ।
કાત્યાયનીસહાયં કલયે શીતાંશુખણ્ડચૂડાલમ્ ॥ ૫૯॥

તત્પુરુષોઽશવરણસ્થલભાજસ્તરુણચન્દ્રચૂડાલાન્ ।
રુદ્રાધ્યાયે પઠિતાન્ રુદ્રાણીસહચરાન્ ભજે રુદ્રાન્ ॥ ૬૦॥

પવમાનસંખ્યયોજનદૂરે બાલતૃણમેચકસ્તસ્ય ।
સાલો મરકતરચિતઃ સમ્પદમચલાં શ્રિયં ચ પુષ્ણાતુ ॥ ૬૧॥

આવૃતિ યુગ્માન્તરતો હરિતમણી-નિવહમેચકે દેશે ।
હાટક-તાલી-વિપિનં હાલાઘટઘટિત-વિટપમાકલયે ॥ ૬૨॥

તત્રૈવ મન્ત્રિણીગૃહપરિણાહં તરલકેતનં સદનમ્ ।
મરકતસૌધમનોજ્ઞં દદ્યાદાયૂષિ દણ્ડનાથાયાઃ ॥ ૬૩॥

સદને તવ હરિન્મણિસઙ્ઘટિતે મણ્ડપે શતસ્તમ્ભે ।
કાર્ત્તસ્વરમયપીઠે કનકમયામ્બુરુહકર્ણિકામધ્યે ॥ ૬૪॥

બિન્દુત્રિકોણવર્તુલષડસ્રવૃત્તદ્વયાન્વિતે ચક્રે ।
સઞ્ચારિણી દશોત્તરશતાર્ણ-મનુરાજકમલકલહંસી ॥ ૬૫॥

કોલવદના કુશેશયનયના કોકારિમણ્ડિતશિખણ્ડા ।
સન્તપ્તકાઞ્ચનાભા સન્ધ્યારુણ-ચેલ-સંવૃત-નિતમ્બા ॥ ૬૬॥

હલમુસલશઙ્ખચક્રાઙ્કુશપાશાભયવરસ્ફુરિતહસ્તા ।
કૂલઙ્કુષાનુકમ્પા કુઙ્કુમજમ્બાલિતસ્તનાભોગા ॥ ૬૭॥

ધૂર્તાનામતિદૂરાવાર્તાશેષાવલગ્નકમનીયા ।
આર્તાલીશુભદાત્રી વાર્તાલી ભવતુ વાઞ્છિતાર્થાય ॥ ૬૮॥

તસ્યાઃ પરિતો દેવીઃ સ્વપ્નેશ્યુન્મત્તભૈરવીમુખ્યાઃ ।

પ્રણમત જમ્ભિન્યાદ્યાઃ ભૈરવવર્ગાંશ્ચ હેતુકપ્રમુખાન્ ॥ ૬૯॥

પૂર્વોક્તસંખ્યયોજનદૂરે પૂયાંશુપાટલસ્તસ્ય ।
વિદ્રાવયતુ મદાર્તિં વિદ્રુમસાલો વિશઙ્કટદ્વારઃ ॥ ૭૦॥

આવરણયોર્મહર્નિશમન્તરભૂમૌ પ્રકાશશાલિન્યામ્ ।
આસીનમમ્બુજાસનમભિનવસિન્દૂરગૌરમહમીડે ॥ ૭૧॥

વરણસ્ય તસ્ય મારુતયોજનતો વિપુલગોપુરદ્વારઃ ।
સાલો નાનારત્નૈઃ સંઘટિતાઙ્ગઃ કૃષીષ્ટ મદભીષ્ટમ્ ॥ ૭૨॥

અન્તરકક્ષ્યામનયોરવિરલશોભાપિચણ્ડિલોદ્દેશામ્ ।
માણિખ્યમણ્ડપાખ્યાં મહતીમધિહૃદયમનિશમાકલયે ॥ ૭૩॥

તત્ર સ્તિથં પ્રસન્નં તરુણતમાલપ્રવાલકિરણાભમ્ ।
કર્ણાવલમ્બિકુણ્ડલકન્દલિતાભીશુકવચિતકપોલમ્ ॥ ૭૪॥

શોણાધરં શુચિસ્મિતમેણાઙ્કવદનમેધમાનકૃપમ્ ।
મુગ્ધૈણમદવિશેષકમુદ્રિતનિટિલેન્દુરેખિકા રુચિરમ્ ॥ ૭૫॥

નાલીકદલસહોદરનયનાઞ્ચલઘટિતમનસિજાકૂતમ્ ।
કમલાકઠિણપયોધરકસ્તૂરી-ઘુસૃણપઙ્કિલોરસ્કમ્ ॥ ૭૬॥

ચામ્પેયગન્ધિકૈશ્યં શમ્પાસબ્રહ્મચારિકૌશેયમ્ ।
શ્રીવત્સકૌસ્તુભધરં શ્રિતજનરક્ષાધુરીણચરણાબ્જમ્ ॥ ૭૭॥

કમ્બુસુદર્શનવિલસત્-કરપદ્મં કણ્ઠલોલવનમાલમ્ ।
મુચુકુન્દમોક્ષફલદં મુકુન્દમાનન્દકન્દમવલમ્બે ॥ ૭૮॥

તદ્વરણોત્તરભાગે તારાપતિ-બિમ્બચુમ્બિનિજશૃઙ્ગઃ ।
વિવિધમણી-ગણઘટિતો વિતરતુ સાલો વિનિર્મલાં ધિષણામ્ ॥ ૭૯॥

પ્રાકારદ્વિતયાન્તરકક્ષ્યાં પૃથુરત્નનિકર-સઙ્કીર્ણામ્ ।
નમત સહસ્રસ્તમ્ભકમણ્ડપનામ્નાતિવિશ્રુતાં ભુવને ॥ ૮૦॥

પ્રણુમસ્તત્ર ભવાનીસહચરમીશાનમિન્દુખણ્ડધરમ્ ।
શૃઙ્ગારનાયિકામનુશીલનભાજોઽપિ ભૃઙ્ગિનન્દિમુખાન્ ॥ ૮૧॥

તસ્યૈણવાહયોજનદૂરે વન્દે મનોમયં વપ્રમ્ ।
અઙ્કૂરન્મણિકિરણામન્તરકક્ષ્યાં ચ નિર્મલામનયોઃ ॥ ૮૨॥

તત્રૈવામૃતવાપીં તરલતરઙ્ગાવલીઢતટયુગ્મામ્ ।
મુક્તામય-કલહંસી-મુદ્રિત-કનકારવિન્દસન્દોહામ્ ॥ ૮૩ ॥

શક્રોપલમયભૃઙ્ગીસઙ્ગીતોન્મેષઘોષિતદિગન્તામ્ ।
કાઞ્ચનમયાઙ્ગવિલસત્કારણ્ડવષણ્ડ-તાણ્ડવમનોજ્ઞામ્ ॥ ૮૪ ॥

કુરુવિન્દાત્મ-કહલ્લક-કોરક-સુષમા-સમૂહ-પાટલિતામ્ ।
કલયે સુધાસ્વરૂપાં કન્દલિતામન્દકૈરવામોદામ્ ॥ ૮૫ ॥

તદ્વાપિકાન્તરાલે તરલે મણિપોતસીમ્નિ વિહરન્તીમ્ ।
સિન્દૂર-પાટલાઙ્ગીં સિતકિરણાઙ્કૂરકલ્પિતવતંસામ્ ॥ ૮૬ ॥

પર્વેન્દુબિમ્બવદનાં પલ્લવશોણાધરસ્ફુરિતહાસામ્ ।
કુટિલકવરીં કુરઙ્ગીશિશુનયનાં કુણ્ડલસ્ફુરિતગણ્ડામ્ ॥ ૮૭ ॥

નિકટસ્થપોતનિલયાઃ શક્તીઃ શયવિધૃતહેમશ◌ૃઙ્ગજલૈઃ ।
પરિષિઞ્ચન્તીં પરિતસ્તારાં તારુણ્યગર્વિતાં વન્દે ॥ ૮૮ ॥

પ્રાગુક્તસઙ્ખ્યયોજનદૂરે પ્રણમામિ બુદ્ધિમયસાલમ્ ।
અનયોરન્તરકક્ષ્યામષ્ટાપદપુષ્ટમેદિનીં રુચિરામ્ ॥ ૮૯ ॥

કાદમ્બરીનિધાનાં કલયામ્યાનન્દવાપિકાં તસ્યામ્ ।
શોણાશ્મનિવહનિર્મિતસોપાનશ્રેણિશોભમાનતટીમ્ ॥ ૯૦ ॥

માણિક્યતરણિનિલયાં મધ્યે તસ્યા મદારુણકપોલામ્ ।
અમૃતેશીત્યભિધાનામન્તઃ કલયામિ વારુણીં દેવીમ્ ॥ ૯૧ ॥

સૌવર્ણકેનિપાતનહસ્તાઃ સૌન્દર્યગર્વિતા દેવ્યઃ ।
તત્પુરતઃ સ્થિતિભાજો વિતરન્ત્વસ્માકમાયુષો વૃદ્ધિમ્ ॥ ૯૨ ॥

તસ્ય પૃષદશ્વયોજનદૂરેઽહઙ્કારસાલમતિતુઙ્ગમ્ ।
વન્દે તયોશ્ચ મધ્યે કક્ષ્યાં વલમાનમલયપવમાનામ્ ॥ ૯૩ ॥

વિનુમો વિમર્શવાપીં સૌષુમ્નસુધાસ્વરૂપિણીં તત્ર ।
વેલાતિલઙ્ઘ્યવીચીકોલાહલભરિતકૂલવનવાટીમ્ ॥ ૯૪ ॥

તત્રૈવ સલિલમધ્યે તાપિઞ્છદલપ્રપઞ્ચસુષમાભામ્ ।
શ્યામલકઞ્ચુકલસિતાં શ્યામા-વિટબિમ્બડમ્બરહરાસ્યામ્ ॥ ૯૫ ॥

આભુગ્નમસૃણચિલ્લીહસિતાયુગ્મશરકાર્મુકવિલાસામ્ ।
મન્દસ્મિતાઞ્ચિતમુખીં મણિમયતાટઙ્કમણ્ડિતકપોલામ્ ॥ ૯૬ ॥

કુરુવિન્દતરણિનિલયાં કુલાચલસ્પર્ધિકુચનમન્મધ્યામ્ ।
કુઙ્કુમવિલિપ્તગાત્રીં કુરુકુલ્લાં મનસિ કુર્મહે સતતમ્ ॥ ૯૭ ॥

તત્સાલોત્તરભાગે ભાનુમયં વપ્રમાશ્રયે દીપ્તમ્ ।
મધ્યં ચ વિપુલમનયોર્મન્યે વિશ્રાન્તમાતપોદ્ગારમ્ ॥ ૯૮ ॥

તત્ર કુરુવિન્દપીઠે તામરસે કનકકર્ણિકાઘટિતે ।
આસીનમરુણવાસસમમ્લાનપ્રસવમાલિકાભરણમ્ ॥ ૯૯ ॥

ચક્ષુષ્મતીપ્રકાશનશક્તિચ્છાયા-સમારચિતકેલિમ્ ।
માણિક્યમુકુટરમ્યં મન્યે માર્તાણ્ડભૈરવં હૃદયે ॥ ૧૦૦ ॥

ઇન્દુમયસાલમીડે તસ્યોત્તરતસ્તુષારગિરિગૌરમ્ ।
અત્યન્ત-શિશિરમારુતમનયોર્મધ્યં ચ ચન્દ્રિકોદ્ગારમ્ ॥ ૧૦૧ ॥

તત્ર પ્રકાશમાનં તારાનિકરૈશ્ચ (સર્વતસ્સેવ્યમ્ ) પરિષ્કૃતોદ્દેશમ્ ।
અમૃતમયકાન્તિકન્દલમન્તઃ કલયામિ કુન્દસિતમિન્દુમ્ ॥ ૧૦૨ ॥

શૃઙ્ગારસાલમીડે શૃઙ્ગોલ્લસિતં તદુત્તરે ભાગે ।
મધ્યસ્થલે તયોરપિ મહિતાં શૃઙ્ગારપૂર્વિકાં પરિખામ્ ॥ ૧૦૩ ॥

તત્ર મણિનૌસ્થિતાભિસ્તપનીયારચિતશૃઙ્ગહસ્તાભિઃ ।
શૃઙ્ગારદેવતાભિઃ સહિતં પરિખાધિપં ભજે મદનમ્ ॥ ૧૦૪ ॥

શૃઙ્ગારવરણવર્યસ્યોત્તરતઃ સકલવિબુધસંસેવ્યમ્ ।
ચિન્તામણિગણરચિતં ચિન્તાં દૂરીકરોતુ મે સદનમ્ ॥ ૧૦૫ ॥

મણિસદન સાલયોરધિમધ્યં દશતાલભૂમિરુહદીર્ઘૈઃ ।
પર્ણૈઃ સુવર્ણવર્ણૈર્યુક્તાં કાણ્ડૈશ્ચ યોજનોત્તુઙ્ગૈઃ ॥ ૧૦૬ ॥

મૃદુલૈસ્તાલીપઞ્ચકમાનૈર્મિલિતાં ચ કેસરકદમ્બૈઃ ।
સન્તતગલિતમરન્દસ્રોતોનિર્યન્મિલિન્દસન્દોહામ્ ॥ ૧૦૭ ॥

પાટીરપવનબાલકધાટીનિર્યત્પરાગપિઞ્જરિતામ્ ।
કલહંસીકુલકલકલકૂલઙ્કુષનિનદનિચયકમનીયામ્ ॥ ૧૦૮ ॥

પદ્માટવીં ભજામઃ પરિમલકલ્લોલપક્ષ્મલોપાન્તામ્ ।
દેવ્યર્ઘ્યપાત્રધારી તસ્યાઃ પૂર્વદિશિ દશકલાયુક્તઃ ।
વલયિતમૂર્તિર્ભગવાન્ વહ્નિઃ કોશોન્નતશ્ચિરં પાયાત્ ॥ ૧૦૯ ॥

તત્રાધારે દેવ્યાઃ પાત્રીરૂપઃ પ્રભાકરઃ શ્રીમાન્ ।
દ્વાદશકલાસમેતો ધ્વાન્તં મમ બહુલમાન્તરં ભિન્દ્યાત્ ॥ ૧૧૦॥

તસ્મિન્ દિનેશપાત્રે તરઙ્ગિતામોદમમૃતમયમર્ઘ્યમ્ ।
ચન્દ્રકલાત્મકમમૃતં સાન્દ્રીકુર્યાદમન્દમાનન્દમ્ ॥ ૧૧૧॥

અમૃતે તસ્મિન્નભિતો વિહરન્ત્યો વિવિધતરણિભાજઃ ।
ષોડશકલાઃ સુધાંશોઃ શોકાદુત્તારયન્તુ મામનિશમ્ ॥ ૧૧૨॥

તત્રૈવ વિહૃતિભાજો ધાતૃમુખાનાં ચ કારણેશાનામ્ ।
સૃષ્ટ્યાદિરૂપિકાસ્તાઃ શમયન્ત્વખિલાઃ કલાશ્ચ સન્તાપમ્ ॥૧૧૩॥

કીનાશવરુણકિન્નરરાજદિગન્તેષુ રત્નગેહસ્ય ।
કલયામિ તાન્યજસ્રં કલયન્ત્વાયુષ્યમર્ઘ્યપાત્રાણિ ॥ ૧૧૪॥

પાત્રસ્થલસ્ય પુરતઃ પદ્મારમણવિધિપાર્વતીશાનામ્ ।
ભવનાનિ શર્મણે નો ભવન્તુ ભાસા પ્રદીપિતજગન્તિ ॥ ૧૧૫॥

સદનસ્યાનલકોણે સતતં પ્રણમામિ કુણ્ડમાગ્નેયમ્ ।
તત્ર સ્થિતં ચ વહ્નિં તરલશિખાજટિલમમ્બિકાજનકમ્ ॥ ૧૧૬॥

તસ્યાસુરદિશિ તાદૃશરત્નપરિસ્ફુરિતપર્વનવકાઢ્યમ્ ।
ચક્રાત્મકં શતાઙ્ગં શતયોજનમુન્નતં ભજે દિવ્યમ્ ॥ ૧૧૭॥

તત્રૈવ દિશિ નિષણ્ણં તપનીયધ્વજપરમ્પરાશ્લિષ્ટમ્ ।
રથમપરં ચ ભવાન્યા રચયામો મનસિ રત્નમયચૂડમ્ ॥ ૧૧૮॥

ભવનસ્ય વાયુભાગે પરિષ્કૃતો વિવિધવૈજયન્તીભિઃ ।
રચયતુ મુદં રથેન્દ્રઃ સચિવેશાન્યાઃ સમસ્તવન્દ્યાયાઃ ॥ ૧૧૯॥

કુર્મોઽધિહૃદયમનિશં ક્રોડાસ્યાયાઃ શતાઙ્ગમૂર્ધન્યમ્ ।
રુદ્રદિશિ રત્નધામ્નો રુચિરશલાકા પ્રપઞ્ચકઞ્ચુકિતમ્ ॥ ૧૨૦॥

પરિતો દેવીધામ્નઃ પ્રણીતવાસા મનુસ્વરૂપિણ્યઃ ।
કુર્વન્તુ રશ્મિમાલાકૃતયઃ કુશલાનિ દેવતા નિખિલાઃ ॥ ૧૨૧॥

પ્રાગ્દ્વારસ્ય ભવાનીધામ્નઃ પાર્શ્વદ્વયારચિતવાસે ।
માતઙ્ગી કિટિમુખ્યૌ મણિસદને મનસિ ભાવયામિ ચિરમ્ ॥ ૧૨૨॥

યોજનયુગલાભોગા તત્કોશપરિણાહયૈવ ભિત્ત્યા ચ ।
ચિન્તામણિગૃહ-ભૂમિર્જીયાદામ્નાયમયચતુર્દ્વારા ॥ ૧૨૩॥

દ્વારે દ્વારે ધામ્નઃ પિણ્ડીભૂતા નવીનબિમ્બાભાઃ ।
વિદધતુ વિપુલાં કીર્તિં દિવ્યા લૌહિત્યસિદ્ધ્યો દેવ્યઃ ॥ ૧૨૪॥

મણિસદનસ્યાન્તરતો મહનીયે રત્નવેદિકામધ્યે ।
બિન્દુમયચક્રમીડે પીઠાનામુપરિ વિરચિતાવાસમ્ ૧૨૫॥

ચક્રાણાં સકલાનાં પ્રથમમધઃ સીમફલકવાસ્તવ્યાઃ ।
અણિમાદિસિદ્ધયો મામવન્તુ દેવી પ્રભાસ્વરૂપિણ્યઃ ॥ ૧૨૬॥

અણિમાદિસિદ્ધિફલકસ્યોપરિહરિણાઙ્કખણ્ડકૃતચૂડાઃ ।
ભદ્રં પક્ષ્મલયન્તુ બ્રાહ્મીપ્રમુખાય માતરોઽસ્માકમ્ ॥ ૧૨૭॥

તસ્યોપરિ મણિફલકે તારુણ્યોત્તુઙ્ગપીનકુચભારાઃ ।
સઙ્ક્ષોભિણીપ્રધાના ભ્રાન્તિં વિદ્રાવયન્તુ દશમુદ્રાઃ ॥ ૧૨૮॥

ફલકત્રયસ્વરૂપે પૃથુલે ત્રૈલોક્યમોહને ચક્રે ।
દીવ્યન્તુ પ્રકટાખ્યાસ્તાસાં કર્ત્રી ચ ભગવતી ત્રિપુરા ॥ ૧૨૯॥

તદુપરિ વિપુલે ધિષ્ણ્યે તરલદૃશસ્તરુણકોકનદભાસઃ ।
કામાકર્ષિણ્યાદ્યાઃ કલયે દેવીઃ કલાધરશિખણ્ડાઃ ॥ ૧૩૦॥

સર્વાશાપરિપૂરકચક્રેઽસ્મિન્ ગુપ્તયોગિની સેવ્યાઃ ।
ત્રિપુરેશી મમ દુરિતં તુદ્યાત્ કણ્ઠાવલમ્બિમણિહારા ॥ ૧૩૧॥

તસ્યોપરિ મણિપીઠે તામ્રામ્ભોરુહદલપ્રભાશોણાઃ ।
ધ્યાયામ્યનઙ્ગકુસુમાપ્રમુખા દેવીશ્ચ વિધૃતકૂર્પાસાઃ ॥ ૧૩૨॥

સઙ્ક્ષોભકારકેઽસ્મિંશ્ચક્રે શ્રીત્રિપુરસુન્દરી સાક્ષાત્ ।
ગોપ્ત્રી ગુપ્તરાખ્યાઃ ગોપાયતુમાં કૃપાર્દ્રયા દૃષ્ટ્યા ॥ ૧૩૩॥

સંક્ષોભિણીપ્રધાનાઃ શક્તીસ્તસ્યોર્ધ્વવલયકૃતવાસાઃ ।
આલોલનીલવેણીરન્તઃ કલયામિ યૌવનોન્મત્તાઃ ॥ ૧૩૪॥

સૌભાગ્યદાયકેઽસ્મિંશ્ચક્રેશી ત્રિપુરવાસિની જીયાત્ ।
શક્તીશ્ચ સમ્પ્રદાયાભિધાઃ સમસ્તાઃ પ્રમોદયન્ત્વનિશમ્ ॥ ૧૩૫॥

મણિપીઠોપરિ તાસાં મહતિ ચતુર્હસ્તવિસ્તૃતે વલયે ।
સન્તતવિરચિતવાસાઃ શક્તીઃ કલયામિ સર્વસિદ્ધિમુખાઃ ॥ ૧૩૬॥

સર્વાર્થસાધકાખ્યે ચક્રેઽમુષ્મિન્ સમસ્તફલદાત્રી ।

ત્રિપુરા શ્રીર્મમ કુશલં દિશતાદુત્તીર્ણયોગિનીસેવ્યા ॥ ૧૩૭॥

તાસાં નિલયસ્યોપરિ ધિષ્ણ્યે કૌસુમ્ભકઞ્ચુકમનોજ્ઞાઃ ।
સર્વજ્ઞાદ્યા દેવ્યઃ સકલાઃ સમ્પાદયન્તુ મમ કીર્તિમ્ ॥ ૧૩૮॥

ચક્રે સમસ્તરક્ષાકરનામ્ન્યસ્મિન્સમસ્તજનસેવ્યામ્ ।
મનસિ નિગર્ભાસહિતાં મન્યે ત્રિપુરમાલિની દેવીમ્ ॥ ૧૩૯॥

સર્વજ્ઞાસદનસ્યોપરિ ચક્રે વિપુલે સમાકલિતગેહાઃ ।
વન્દે વશિનીમુખ્યાઃ શક્તીઃ સિન્દૂરરેણુશોણરુચઃ ॥ ૧૪૦॥

શ્રીસર્વરોગહારિણિચક્રેઽસ્મિન્ત્રિપુરપૂર્વિકાં સિદ્ધામ્ ।
વન્દે રહસ્યનામ્ના વેદ્યાભિઃ શક્તિભિઃ સદા સેવ્યામ્ ॥ ૧૪૧॥

વશિનીગૃહોપરિષ્ટાદ્ વિંશતિહસ્તોન્નતે મહાપીઠે ।
શમયન્તુ શત્રુવૃન્દં શસ્ત્રાણ્યસ્ત્રાણિ ચાદિદમ્પત્યોઃ ॥ ૧૪૨॥

શસ્ત્રસદનોપરિષ્ટા વલયે વલવૈરિરત્નસઙ્ઘટિતે ।
કામેશ્વરીપ્રધાનાઃ કલયે દેવીઃ સમસ્તજનવન્દ્યાઃ ॥ ૧૪૩॥

ચક્રેઽત્ર સર્વસિદ્ધિપ્રદનામનિ સર્વફલદાત્રી ।
ત્રિપુરામ્બાવતુ સતતં પરાપરરહસ્યયોગિનીસેવ્યા ॥ ૧૪૪॥

કામેશ્વરીગૃહોપરિવલયે વિવિધમનુસમ્પ્રદાયજ્ઞાઃ ।
ચત્વારો યુગનાથા જયન્તુ મિત્રેશપૂર્વકા ગુરવઃ ॥ ૧૪૫॥

નાથભવનોપરિષ્ટાન્નાનારત્નચયમેદુરે પીઠે ।
કામેશ્યાદ્યા નિત્યાઃકલયન્તુ મુદં તિથિસ્વરૂપિણ્યઃ ॥ ૧૪૬॥

નિત્યાસદનસ્યોપરિ નિર્મલમણિનિવહવિરચિતે ધિષ્ણ્યે ।
કુશલં ષડઙ્ગદેવ્યઃ કલયન્ત્વસ્માકમુત્તરલનેત્રાઃ ॥ ૧૪૭॥

સદનસ્યોપરિ તાસાં સર્વાનન્દમયનામકે બિન્દૌ ।
પઞ્ચબ્રહ્માકારાં મઞ્ચં પ્રણમામિ મણિગણાકીર્ણમ્ ॥ ૧૪૮॥

પરિતો મણિમઞ્ચસ્ય પ્રલમ્બમાના નિયન્ત્રિતા પાશૈઃ ।
માયામયી યવનિકા મમ દુરિતં હરતુ મેચકચ્છાયા ॥ ૧૪૯॥

મઞ્ચસ્યોપરિ લમ્બન્મદનીપુન્નાગમાલિકાભરિતમ્ ।
હરિગોપમયવિતાનં હરતાદાલસ્યમનિશમસ્માકમ્ ॥ ૧૫૦॥

પર્યઙ્કસ્ય ભજામઃ પાદાન્બિમ્બામ્બુદેન્દુહેમરુચઃ ।
અજહરિરુદ્રેશમયાનનલાસુરમારુતેશકોણસ્થાન્ ॥ ૧૫૧॥

ફલકં સદાશિવમયં પ્રણૌમિ સિન્દૂરરેણુકિરણાભમ્ ।
આરભ્યાઙ્ગેશીનાં સદનાત્કલિતં ચ રત્નસોપાનમ્ ॥ ૧૫૨॥

પટ્ટોપધાનગણ્ડકચતુષ્ટયસ્ફુરિતપાટલાસ્તરણમ્ ।
પર્યઙ્કોપરિઘટિતં પાતુ ચિરં હંસતૂલશયનં નઃ ॥ ૧૫૩॥

તસ્યોપરિ નિવસન્તં તારુણ્યશ્રીનિષેવિતં સતતમ્ ।
આવૃન્તપુલ્લહલ્લકમરીચિકાપુઞ્જમઞ્જુલચ્છાયમ્ ॥ ૧૫૪॥

સિન્દૂરશોણવસનં શીતાંશુસ્તબકચુમ્બિતકિરીટમ્ ।
કુઙ્કુમતિલકમનોહરકુટિલાલિકહસિતકુમુદબન્ધુશિશુમ્ ॥ ૧૫૫॥

પૂર્ણેન્દુબિમ્બવદનં ફુલ્લસરોજાતલોચનત્રિતયમ્ ।
તરલાપાઙ્ગતરઙ્ગિતશફરાઙ્કનશાસ્ત્રસમ્પ્રદાયાર્થમ્ ॥ ૧૫૬॥

મણિમયકુણ્ડલપુષ્યન્મરીચિકલ્લોલમાંસલકપોલમ્ ।
વિદ્રુમસહોદરાધરવિસૃમરસ્મિત-કિશોરસઞ્ચારમ્ ॥ ૧૫૭॥

આમોદિકુસુમશેખરમાનીલભ્રૂલતાયુગમનોજ્ઞમ્ ।
વીટીસૌરભંવીચીદ્વિગુણિતવક્ત્રારવિન્દસૌરભ્યમ્ ॥ ૧૫૮॥

પાશાઙ્કુશેક્ષુચાપપ્રસવશરસ્ફુરિતકોમલકરાબ્જમ્ ।
કાશ્મીરપઙ્કિલાઙ્ગં કામેશં મનસિ કુર્મહે સતતમ્ ॥ ૧૫૯॥

તસ્યાઙ્કભુવિ નિષણ્ણાં તરુણકદમ્બપ્રસૂનકિરણાભામ્ ।
શીતાંશુખણ્ડચૂડાં સીમન્તન્યસ્તસાન્દ્રસિન્દૂરામ્ ॥ ૧૬૦॥

કુઙ્કુમલલામભાસ્વન્નિટિલાં કુટિલતરચિલ્લિકાયુગલામ્ ।
નાલીકતુલ્યનયનાં નાસાઞ્ચલનટિતમૌક્તિકાભરણામ્ ॥ ૧૬૧॥

અઙ્કુરિતમન્દહાસમરુણાધરકાન્તિવિજિતબિમ્બાભામ્ ।
કસ્તૂરીમકરીયુતકપોલસઙ્ક્રાન્તકનકતાટઙ્કામ્ ॥ ૧૬૨॥

કર્પૂરસાન્દ્રવીટીકબલિત વદનારવિન્દ કમનીયામ્ ।
કમ્બુસહોદરકણ્ઠપ્રલમ્બમાનાચ્છમૌક્તિકકલાપામ્ ॥ ૧૬૩॥

કલ્હારદામકોમલભુજયુગલસ્ફુરિતરત્નકેયૂરામ્ ।
કરપદ્મમૂલવિલસત્ કાઞ્ચનમયકટકવલયસન્દોહામ્ ॥ ૧૬૪॥

પાણિચતુષ્ટય વિલસત્ પાશાઙ્કુશપુણ્ડ્રચાપપુષ્પાસ્ત્રામ્ ।
કૂલઙ્કુષકુચશિખરાં કુઙ્કુમકર્દમિતરત્નકૂર્પાસામ્ ॥ ૧૬૫॥

અણુદાયાદવલગ્નામમ્બુદશોભાસનાભિ-રોમલતામ્ ।
માણિક્યખચિતકાઞ્ચીમરીચિકાક્રાન્તમાંસલનિતમ્બામ્ ॥ ૧૬૬॥

કરભોરુકાણ્ડયુગલાં જઙ્ઘાજિતકામજૈત્રતૂણીરામ્ ।
પ્રપદપરિભૂતકૂર્માં પલ્લવસચ્છાયપદયુગમનોજ્ઞામ્ ॥ ૧૬૭॥

કમલભવકઞ્જલોચનકિરીટરત્નાંશુરઞ્જિતપદાબ્જામ્ ।
ઉન્મસ્તકાનુકમ્પામુત્તરલાપાઙ્ગપોષિતાનઙ્ગામ્ ॥ ૧૬૮॥

આદિમરસાવલમ્બામનિદં પ્રથમોક્તિવલ્લરીકલિકામ્ ।
આબ્રહ્મકીટજનનીં અન્તઃ કલયામિ સુન્દરીમનિશમ્ ॥ ૧૬૯॥

કસ્તુ ક્ષિતૌ પટીયાન્વસ્તુસ્તોતું શિવાઙ્કુવાસ્તવ્યમ્ ।
અસ્તુ ચિરન્તનસુકૃતૈઃ પ્રસ્તુતકામ્યાય તન્મમ પુરસ્તાત્ ॥ ૧૭૦॥

પ્રભુસમ્મિતોક્તિગમ્યે પરમશિવોત્સઙ્ગતુઙ્ગપર્યઙ્કમ્ ।
તેજઃ કિઞ્ચન દિવ્યં પુરતો મે ભવતુ પુણ્ડ્રકોદણ્ડમ્ ॥ ૧૭૧॥

મધુરિમભરિતશરાસં મકરન્દસ્પન્દિમાર્ગણોદારમ્ ।
કૈરવિણીવિટચૂડં કૈવલ્યાયાસ્તુ કિઞ્ચન મહો નઃ ॥ ૧૭૨॥

અક્ષુદ્રમિક્ષુચાપં પરોક્ષમવલગ્નસીમ્નિ ત્ર્યક્ષમ્ ।
ક્ષપયતુ મે ક્ષેમેતરમુક્ષરથપ્રેમપક્ષ્મલં તેજઃ ॥ ૧૭૩॥

ભૃઙ્ગરુચિસઙ્ગરકરાપાઙ્ગં શ‍ૃઙ્ગારતુઙ્ગમરુણાઙ્ગમ્ ।
મઙ્ગલમભઙ્ગુરં મે ઘટયતુ ગઙ્ગાધરાઙ્ગસઙ્ગિ મહઃ ॥ ૧૭૪॥

પ્રપદજિતકૂર્મમૂર્મિલકરુણં ભર્મરુચિનિર્મથનદેહમ્ ।
શ્રિતવર્મ મર્મ શમ્ભોઃ કિઞ્ચન નર્મ મમ શર્મનિર્માતુ ॥ ૧૭૫॥

કાલકુરલાલિકાલિમકન્દલવિજિતાલિવિ ધૃતમણિવાલિ ।
મિલતુ હૃદિ પુલિનજલઘનં બહુલિત ગલગરલકેલિ કિમપિ મહઃ ॥ ૧૭૬॥

કુઙ્કુમતિલકિતફાલા કુરુવિન્દચ્છાયપાટલદુકૂલા ।
કરુણાપયોધિવેલા કાચન ચિત્તે ચકાસ્તુ મે લીલા ॥ ૧૭૭॥

પુષ્પન્ધયરુચિવેણ્યઃ પુલિનાભોગત્રપાકરશ્રેણ્યઃ ।

જીયાસુરિક્ષુપાણયઃ કાશ્ચન કામારિકેલિસાક્ષિણ્યઃ ॥ ૧૭૮॥

તપનીયાંશુકભાંસિ દ્રાક્ષામાધુર્યનાસ્તિકવચાંસિ ।
કતિચન શુચં મહાંસિ ક્ષપયતુ કપાલિતોષિતમનાંસિ ॥ ૧૭૯॥

અસિતકચમાયતાક્ષં કુસુમશરં કુલમુદ્વહકૃપાર્દ્રમ્ ।
આદિમરસાધિદૈવતમન્તઃ કલયે હરાઙ્કવાસિ મહઃ ॥ ૧૮૦॥

કર્ણોપાન્તતરઙ્ગિતકટાક્ષનિસ્પન્દિ કણ્ઠદઘ્નકૃપામ્ ।
કામેશ્વરાઙ્કનિલયાં કામપિ વિદ્યાં પુરાતનીં કલયે ॥ ૧૮૧॥

અરવિન્દકાન્ત્યરુન્તુદવિલોચનદ્વન્દ્વસુન્દરમુખેન્દુઃ ।
છન્દઃ કન્દલમન્દિરમન્તઃ પુરમૈન્દુશેખરં વન્દે ॥ ૧૮૨॥

બિમ્બનિકુરુમ્બડમ્બરવિડમ્બકચ્છાયમમ્બરવલગ્નમ્ ।
કમ્બુગલમમ્બુદકુચં બિમ્બોકં કમપિ ચુમ્બતુ મનો મે ॥ ૧૮૩॥

કમપિ કમનીયરૂપં કલયામ્યન્તઃ કદમ્બકુસુમાઢ્યમ્ ।
ચમ્પકરુચિરસુવેષૈઃ સમ્પાદિતકાન્ત્યલંકૃતદિગન્તમ્ ॥ ૧૮૪॥

શમ્પારુચિભરગર્હા સમ્પાદક ક્રાન્તિ કવચિત દિગન્તમ્ ।
સિધ્ધાન્તં નિગમાનાં શુધ્ધાન્તં કિમપિ શૂલિનઃ કલયે ॥ ૧૮૫॥

ઉદ્યદ્દિનકરશોણાનુત્પલબન્ધુસ્તનન્ધયાપીડાન્ ।
કરકલિતપુણ્ડ્રચાપાન્ કલયે કાનપિ કપર્દિનઃ પ્રાણાન્ ॥ ૧૮૬॥

રશનાલસજ્જઘનયા રસનાજીવાતુ-ચાપભાસુરયા ।
ઘ્રાણાયુષ્કરશરયા ઘ્રાતં ચિત્તં કયાપિ વાસનય ॥ ૧૮૭॥

સરસિજસહયુધ્વદૃશા શમ્પાલતિકાસનાભિવિગ્રહયા ।
ભાસા કયાપિ ચેતો નાસામણિ શોભિવદનયા ભરિતમ્ ॥ ૧૮૮॥

નવયાવકાભસિચયાન્વિતયા ગજયાનયા દયાપરયા ।
ધૃતયામિનીશકલયા ધિયા કયાપિ ક્ષતામયા હિ વયમ્ ॥ ૧૮૯॥

અલમલમકુસુમબાણૈઃ બિમ્બશોણૈઃ પુણ્ડ્રકોદણ્ડૈઃ ।
અકુમુદબાન્ધવચૂડૈરન્યૈરિહ જગતિ દૈવતં મન્યૈઃ ॥ ૧૯૦॥

કુવલયસદૃક્ષનયનૈઃ કુલગિરિકૂટસ્થબન્ધુકુચભારૈઃ ।
કરુણાસ્પન્દિકટાક્ષૈઃ કવચિતચિત્તોઽસ્મિ કતિપયૈઃ કુતુકૈઃ ॥ ૧૯૧॥

નતજનસુલભાય નમો નાલીકસનાભિલોચનાય નમઃ ।
નન્દિત ગિરિશાય નમો મહસે નવનીપપાટલાય નમઃ ॥ ૧૯૨॥

કાદમ્બકુસુમધામ્ને કાયચ્છાયાકણાયિતાર્યમ્ણે ।
સીમ્ને ચિરન્તનગિરાં ભૂમ્ને કસ્મૈચિદાદધે પ્રણતિમ્ ॥ ૧૯૩॥

કુટિલકબરીભરેભ્યઃ કુઙ્કુમસબ્રહ્મચારિકિરણેભ્યઃ ।
કૂલઙ્કુષસ્તનેભ્યઃ કુર્મઃ પ્રણતિં કુલાદ્રિકુતુકેભ્યઃ ॥ ૧૯૪॥

કોકણદશોણ ચરણાત્ કોમલ કુરલાલિ વિજિતશૈવાલાત્ ।
ઉત્પલસુગન્ધિ નયનાદુરરીકુર્મો ન દેવતમાન્યામ્ ॥ ૧૯૫॥

આપાટલાધરાણામાનીલસ્નિગ્ધબર્બરકચાનામ્ ।
આમ્નાય જીવનાનામાકૂતાનાં હરસ્ય દાસોઽસ્મિ ॥ ૧૯૬॥

પુઙ્ખિતવિલાસહાસસ્ફુરિતાસુ પુરાહિતાઙ્કનિલયાસુ ।
મગ્નં મનોમદીયં કાસ્વપિ કામારિ જીવનાડીષુ ॥ ૧૯૭॥

લલિતા પાતુ શિરો મે લલાટામ્બા ચ મધુમતીરૂપા ।
ભ્રૂયુગ્મં ચ ભવાની પુષ્પશરા પાતુ લોચનદ્વન્દ્વમ્ ॥ ૧૯૮॥

પાયાન્નાસાં બાલા સુભગા દન્તાંશ્ચ સુન્દરી જિહ્વામ્ ।
અધરોષ્ટમાદિશક્તિશ્ચક્રેશી પાતુ મે ચિરં ચિબુકમ્ ॥ ૧૯૯॥

કામેશ્વરી ચ કર્ણૌ કામાક્ષી પાતુ ગણ્ડયોર્યુગલમ્ ।
શૃઙ્ગારનાયિકાવ્યાદ્વદનં સિંહાસનેશ્વરી ચ ગલમ્ ॥ ૨૦૦॥

સ્કન્દપ્રસૂશ્ચ પાતુ સ્કન્ધૌ બાહૂ ચ પાટલાઙ્ગી મે ।
પાણી ચ પદ્મનિલયા પાયાદનિશં નખાવલીર્વિજયા ॥ ૨૦૧॥

કોદણ્ડિની ચ વક્ષઃ કુક્ષિં ચાવ્યાત્ કુલાચલતનૂજા ।
કલ્યાણી ચ વલગ્નં કટિં ચ પાયાત્કલાધરશિખણ્ડા ॥ ૨૦૨॥

ઊરુદ્વયં ચ પાયાદુમા મૃડાની ચ જાનુની રક્ષેત્ ।
જઙ્ઘે ચ ષોડશી મે પાયાત્ પાદૌ ચ પાશસૃણિ હસ્તા ॥ ૨૦૩॥

પ્રાતઃ પાતુ પરા માં મધ્યાહ્ને પાતુ મણિગૃહાધીશા ।
શર્વાણ્યવતુ ચ સાયં પાયાદ્રાત્રૌ ચ ભૈરવી સાક્ષાત્ ॥ ૨૦૪॥

ભાર્યાં રક્ષતુ ગૌરી પાયાત્ પુત્રાંશ્ચ બિન્દુગૃહપીઠા ।
શ્રીવિદ્યા ચ યશો મે શીલં ચાવ્યાચ્ચિરં મહારાજ્ઞી ॥ ૨૦૫॥

પવનમયિ પાવકમયિ ક્ષોણીમયિ ગગનમયિ કૃપીટમયિ ।
રવિમયિ શશિમયિ દિઙ્મયિ સમયમયિ પ્રાણમયિ શિવે પાહિ ॥ ૨૦૬॥

કાલિ કપાલિનિ શૂલિનિ ભૈરવિ માતઙ્ગિ પઞ્ચમિ ત્રિપુરે ।
વાગ્દેવિ વિન્ધ્યવાસિનિ બાલે ભુવનેશિ પાલય ચિરં મામ્ ॥ ૨૦૭॥

અભિનવસિન્દૂરાભામમ્બ ત્વાં ચિન્તયન્તિ યે હૃદયે ।
ઉપરિ નિપતન્તિ તેષામુત્પલનયનાકટાક્ષકલ્લોલાઃ ॥ ૨૦૮॥

વર્ગાષ્ટકમિલિતાભિર્વશિનીમુખ્યાભિરાવૃતાં ભવતીમ્ ।
ચિન્તયતાં સિતવર્ણાં વાચો નિર્યાન્ત્યયત્નતો વદનાત્ ॥ ૨૦૯॥

કનકશલાકાગૌરીં કર્ણવ્યાલોલકુણ્ડલદ્વિતયામ્ ।
પ્રહસિતમુખીં ચ ભવતીં ધ્યાયન્તો યે ત એવ ભૂધનદાઃ ॥ ૨૧૦॥

શીર્ષામ્ભોરુહમધ્યે શીતલપીયૂષવર્ષિણીં ભવતીમ્ ।
અનુદિનમનુચિન્તયતામાયુષ્યં ભવતિ પુષ્કલમવન્યામ્ ॥ ૨૧૧॥

મધુરસ્મિતાં મદારુણનયનાં માતઙ્ગકુમ્ભવક્ષોજામ્ ।
ચન્દ્રવતંસિનીં ત્વાં સવિધે પશ્યન્તિ સુકૃતિનઃ કેચિત્ ॥ ૨૧૨॥

લલિતાયાઃ સ્તવરત્નં લલિતપદાભિઃ પ્રણીતમાર્યાભિઃ ।
પ્રતિદિનમવનૌ પઠતાં ફલાનિ વક્તું પ્રગલ્ભતે સૈવ ॥ ૨૧૩॥

સદસદનુગ્રહનિગ્રહગૃહીતમુનિવિગ્રહો ભગવાન્ ।
સર્વાસામુપનિષદાં દુર્વાસા જયતિ દેશિકઃ પ્રથમઃ ॥ ૨૧૪॥

॥ ઇતિ મહર્ષિદુર્વાસઃ પ્રણીતં લલિતાસ્તવરત્નં સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*lalitAstavaratnam by Durvasa*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*